श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि कृतिषु

# ॥ श्रीहयग्रीवविंशतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri N. Ananthanarayana of Chennai for his help in the preparation of this document.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीहयग्रीवविंशतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

वन्दे वेङ्कटशेषार्यं वत्सवंशैकमौक्तिकम्।
वात्स्यश्रीवरदाचार्यवत्सं वत्सलमानते॥ १ ॥

लक्ष्मीतुरङ्गानन! बाहवस्ते
चत्वार एवं न कथं नु पादाः?।
इत्यानतश्रीचतुराननोक्तीः
शृण्वन् हयास्यः स्मितमातनोति॥ २ ॥

सुधांशुबिम्बात् तव वासभूतात्
सुधांशुखण्डा दशधा विलग्नाः।
नखात्मना त्वच्चरणाग्रदेशे
सुधामयीं नः फणितिं दिशन्ति॥ ३ ॥

बिभर्ति यस्त्वां मनुजो निजान्तः
कलानिधिस्स्यात् स इहेति सत्यम्।
वहन्निजान्तस्सततं स एषः
कलानिधिस्तत्र निदर्शनं नः॥ ४ ॥

जङ्घा त्वदीया नयनाभिरामा
जङ्घालतामेव ददाति वाचाम्।
प्रवाहभूम्नीति विभाति चित्ते
प्रवाद एवं महतां न मिथ्या॥ ५ ॥

नखानि यस्ते हृदये विधत्ते
नवानि मान्यानि मनोहराणि।

न खानि तस्यापथसङ्गतानि
    भवन्ति विद्वत्ततिभिस्स्तुतानि॥ ६ ॥

रम्भादिवाह्यरमणीयतनुप्रकारा
    रामा रमासि रमणीमणिरत्र सा त्वम्।
रम्भाभिरामसुभगोरुगता भवेम
    इत्यङ्कगां वितनुषे नु रमां हयास्य!॥ ७ ॥

आकुञ्चिताङ्घ्रिरुचिरोरुतले निविष्टा
    पादौ प्रसार्य भवदेकपदेन साकम्।
लक्ष्मीस्तव त्रिपदभूतिमधो व्यनक्ति
    दिव्यन्यथेति किमिदं श्रुतिवाग्विरुद्धम्॥ ८ ॥

कुक्षिः कृशस्तदुदरं परिकीर्त्यतेऽसौ
    वक्षो विशालमथ भातितरामुदारम्।
आद्ये जगन्ति जगतां जननी परस्मिन्
    इत्यौचिती च जनतां नितरां धिनोति॥ ९ ॥

कण्ठं विलोक्य कमनीयमयं च कम्बुः
    वक्षो विलोक्य जगतां जननीं तथाङ्के।
द्वेधा निजाकृतिमहो भवतश्शरीरे
    लीलावतीमिह विभाव्य मुदं प्रयाति॥ १० ॥

अङ्कं विहाय तव दक्षिणमाप कस्मात्
    वामं रमा हयमुखेति विमृश्य चेतः।
पाणिं तवातिमधुरं शुभबोधमुद्रं
    संवीक्षितुं विशदमित्यथ निश्चिनोति॥ ११ ॥

स्वामिन्! करेण कलयन्निह बोधमुद्रां
    उच्चैः करेण कलयंश्च सुदर्शनं किम् ?।
उच्चैस्सुदर्शनमुपागतशिष्यवर्गं
    सम्बोधयस्यतितरामिति चिन्तयामि॥ १२ ॥

अस्मिन् करे वहसि शोभनबोधमुद्रां
    अन्यत्र बोधमयकम्बुमतीव युक्तम्।
अन्यत्र पुस्तकमिदं तदिवेदमासीत्
    नासाम्प्रतं किमपि कर्मणि ते किल स्यात्॥ १३॥

लक्ष्मीश्च शङ्खश्च समुद्रजातौ
    एकत्र पार्श्वे तदिमौ विधत्से।
लक्ष्मीं यथा वक्षसि कौस्तुभं च
    लक्ष्मीं च चन्द्रं च यथा स्वचित्ते॥ १४॥

चन्द्रः किलायं हृदयात्तवाभूत्
    लक्ष्मीतुरङ्गानन! तत् कृतज्ञः।
अन्तर्विधत्ते सततं भवन्तं
    कलानिधिस्तेन जगत्प्रसिद्धः॥ १५॥

चक्षुर्गोचरतां गतं मम सदा तत् स्यात् हयास्यं महः
    मुद्रां बोधकरीं करेण करयोः चक्रं सहस्रार्कभम्।
शङ्खं तं धवलं सहस्रशशिभं पुस्तं च हस्ते परे
    विद्यानां निलयं दधत् परतरं वाग्देवतावन्दितम्॥ १६॥

श्वेतं किञ्चन वाजिराजवदनं वाग्देवतावन्दितं
    वामाङ्कस्थितवारिराशितनयं वेदान्तविद्यानिधिम्।
चान्द्रं बिम्बमुपाश्रितं श्रितवशं चक्रं च शङ्खं तथा
    मुद्रां बोधकरीं च पुस्तकमणिं बिभ्रत् महस्संश्रये॥ १७॥

स्वामिन्! किं स भवान् विधाय वनितां वाराशिकन्यामिमां
    वामाङ्के भगवन्! दरं च सुभगं वामे करे कोमले।
ताभ्यां वाचमहो! रसौघभरितां व्याख्यानमुद्रां वहन्
    प्रीत्या तां विवृणोति तत्र च पुमानुच्चैरधस्स्त्री स्थिता॥ १८॥

विद्यां विग्रहसंयुतामिव रमां वामाङ्कभागस्स्थितां
    विद्यारूपमिमं च शङ्खमतुलं वामैकपाणिस्थितम्।



www.prapatti.com

विद्याधारिणमेव पुस्तकमणिं वामान्यपाणिस्थितं
　विद्यादानवदान्य! वाजिवदन! त्वं राजसे लालयन्॥ १९ ॥

वाराशेस्तनयां वहन्नतितरामानन्दपूर्णान्तरः
　वाराशेस्तनये वसन्नपि तथा सन्नन्दथोर्वारिधिः।
वाग्देवीधृतपादपङ्कजयुगो वाचामयं नायको
　वाचां काञ्चनधोरणीमपि वहन् वाज्याननो वर्धते॥ २० ॥

योषालङ्कृतमञ्जुलाङ्कमधुरः शेषासनावस्थितः
　भाषानाथसमीडिताङ्घ्रियुगलो दोषाधिपान्तस्स्थितः।
हेषावेषसमस्तवेदनिवहः घोषान् क्षिपन् वादिनां
　शोषायाघजलाशयस्य नितरां तोषाय च स्यात् स नः॥ २१ ॥

श्रीमन्! वाजिमुखेति वारिधिसुतासम्भूषिताङ्केति च
　स्वामिन्! वागधिपेति वादविहृतौ विद्योतमानेति च।
वाराशेरुदिते सुधामयतनौ वासं भजन्तं नवं
　वारं वारमियं भवन्तमनघं जिह्वा गृणातु स्वयम्॥ २२ ॥

हे लक्ष्मीहयवक्त्र! मामकमनस्ते मन्दुरा शोभना
　यस्मिन् फल्गुपदार्थलोभजडता तृण्येति विद्योतते।
आस्वाद्य स्वयमञ्जसा तव गिरं सन्तुष्टचित्तो भवान्
　कामं तत्र करोतु शुद्धिमति मे सेयं सती प्रार्थना॥ २३ ॥

हयमुखविंशतिरेषा
　मानिधिकविनाथमञ्जुवागुदिता।
वाणीं मधुरां सार्थां
　पठतां दातुं सकौतुका जयति॥ २४ ॥

॥ इति श्रीहयग्रीवविंशतिः समाप्ता ॥

www.prapatti.com